**शल्भ** प्रशंसायां भ्वा०आ०सक० सेट् । शल्भते अशल्भिष्ट ।

**श(शा)ल्मलि** पु० शल—मलच् स्वार्थे इन् इञ् वा । शाल्मलिवृक्षे (शिमुल) द्विरूपकोषः स्त्रीत्वमपि तत्र वा ङीप् तत्रार्थे ।

**शल्य** न० शल—यत् । १वाणे २तोमरे ३श्वेडे मेदि० ४वंशकविकायां विश्वः । ५दुःखे ६दुर्वाक्ये शब्दर० ७पापे त्रिका० "शल्यं नाम विविधतृणकाष्ठपाषाणपांशुलोष्टबालनखपूयास्रावान्तर्गर्भशल्योद्धारणार्थं यन्त्रशस्त्रक्षाराग्निप्रणिधानं व्रणविनिश्चयार्थञ्च" सुश्रुतोक्ते ८चिकित्साङ्गे यन्त्रभेदे ९अस्थ्नि ज्यो०त०। वास्तुभूमिस्थ शल्यज्ञानं प्रश्नाक्षरेण यथा भवति तथोक्तं ज्यो०त०

"सुनिश्चितां मन्दिरभूमिमादौ निखाय तोयावधि यत्नतस्ताम् । कुर्य्याद्विशल्यामथ वा स्वमानं खात्वाथ वा प्रश्नवशाद्विधिज्ञः । दूर्वाप्रवालाक्षतपुष्पपाणिः शुचिः शुचिं दैवविदं समेत्य । पृच्छेद्विनीतो मधुरस्वरेण शल्यस्य तत्त्वं भवने तदीयः । ततः प्रश्नादिमो वर्णः सम्भाव्यो यत्नतोऽथ वा । क्रमात् पुष्पापगादेवफलानां श्रवणादिवः । प्रणवो धरणी धारिणी करौ तदनन्तरम् । न भूत्यै नम इत्येष मन्त्रो वह्निप्रियात्मकः" वह्निप्रिया स्वाहा "मन्त्रेणानेन कठिनीमभिमन्त्र्य विभाजयेत् । नवधा सदनक्षेत्रं तया पश्चाद्विलेखयेत् । वकचत एहाः शपया नव चेत् प्रश्नाक्षराणि जायन्ते । प्रागादिकोष्ठनवके वर्णोक्ते शल्यमाख्यान्ति । प्रश्ने वकारः पुरतो नरास्थि अशीति शल्यं मरकप्रदायि । श्रोणीशदण्डोरगहेतुमृत्युप्रदं ककारः खरशल्यमग्नौ । याम्यं चकारः श्वगास्थिवेश्म प्रभोर्विनाशं प्रकरोति शल्यम् । रक्षोदिशि श्वास्थि गृहस्थितानां मृत्युद्वयं वक्ति सुनिश्चितं तः । एः पाश्चिदिश्यस्थि शिशोर्ब्रवीति मृत्युं प्रवासाद् गृहमेव शल्यम् । ह्नोवायुकोणे नरकूपमस्थि दारिद्र्यमित्रक्षयकृद्विधत्ते । धनपदिशि शकारः प्राह विप्रास्थि विप्रक्षयकृदथ पकारो वक्ति कृत्यास्थि शम्भौ । तदिह कुलविनाशं गोधनानाञ्च हानिं वितरति गृहनाथस्यापि गुप्तस्य दैवैः । यो मध्यभागे भषितं कपालं कालायसं चाह कुलक्षयाय । यत्नादपास्यान्यधुना प्रमाणं सर्वत्र तथ्यं कथयामि शल्ये। इन्द्रयक्षोजलेशाने शल्यं सार्द्धकरे कटौ । वह्न्यन्तककुबेरेषु पुरुषे मध्यवातयोः" । देवीपु० "पुरुषाधःस्थितं शल्यं न गृहे दोषदं भवेत् । प्रासादे दोषदं शल्यं भवेत् यावज्जलान्तकम् । गृहारम्भेऽतिकण्डूतिः स्वाम्यङ्गे यदि जायते । शल्यं त्वपनयेत्तत्र प्रासादे भवनेऽपि वा" । १०मदनवृक्षे ११श्वाविधि च पु० अमरः १२नकुलमातुले मद्राधिपे नृपभेदे पु०१३सीम्नि १४शलाकायां पु० हेमच० १५बिल्ववृक्षे पु० १६मत्स्यभेदे राजनि० । १७शल्लभेदे पु० त्रिका० ।

**शल्यक** पु० शल्य इव कायति कै-क । १मदनवृक्षे ( मयना ) शब्दच०। २शल्लकीखगे च पुंस्त्री० स्त्रियां ङीष् राजनि० ।

**शल्यलोमन्** न० शल्यमिव लोम । शल्लकीलोम्नि राजनि० ।

**शल्यारि** पु० ६त० । शल्यान्तप्रहर्त्तरि युधिष्ठिरे तद्धननकथा भा० शल्य० दृश्या ।

**शल्ल** गतौ भ्वा० पर० सक० सेट् । शल्लति अशल्लीत् ।

**शल्ल** न० शल्ल-अच् । १त्वचि २भेके पु० शब्दच० । स्वार्थे क । त्वचि न०। ३शोणवृक्षे पु० जटा० । (सजारु) ४पक्षिभेदे स्त्री गौरा० ङीष् । सा च ५गजभक्ष्यावृक्षे अमरः ।

**शल्लकीद्रव** पु० शल्लक्याद्रव इव स्वादुत्वात् । सिह्लके जटा० ।

**शल्व** पु० शल-व । शाल्वदेशे उणा०। [अशवीत् ।

**शव** विकारे गतौ च भ्वा०पर०सक० सेट् । शवति·अशावीत्

**शव** पु०न० शव-अच्। मृतदेहे गतप्राणे १देहे अमरः । २जले न० मेदि० ।

**शवकाम्य** न० शवः काम्यो यस्य । कुक्कुरे शब्दर० ।

**शवयान** न० शववाहनं यानम् शाक० । मृतदेहवाहनार्थे तल्पे हारा० ।

**शवर** न० शव-अरन् । १म्लेच्छजातिभेदे अमरः । २पानीये ३शिवे च पु० मेदि० ३ततृपत्न्यां स्त्री ङीष् । ४शास्त्रभेदे ५हस्ते पु० उणादिको० मीमांसाभाष्यकारके ६विद्वद्भेदे । [शब्दर० ।

**शवरथ** पु० शववाहनार्थं रथः शाक० । शववाहनार्थे याने

**शवरलोध्र** पु० शवरप्रियः लोध्रः । श्वेतलोध्रे रत्नमा०।

**शवरालय** पु० ६त० । शवरावासस्थाने अमरः ।

**शवल** पु० शव—कलन् । १कर्बूरवर्णे २तद्वति त्रि० अमरः । ३तद्वर्णवत्यां धेनौ स्त्री अमरः ।

**शवसान** पु० शव--आनच् सुक् च । पथिके सि०कौ० ।

**शश** प्लुतगतौ भ्वा०पर०सक०सेट् । शशति। अशाशीत्·अशशीत्

**शश** पुंस्त्री० शश-अच् । पशुभेदे (खरगोश) अमरः । स्वार्थे क । तत्रैव ।

"शशः शीतो लघुर्ग्राही रूक्षः स्वादुः सदा हितः । वह्निकृत् कफपित्तघ्नो वातसाधारणः स्मृतः । ज्वरा-